कुमारी भेदिनी शीता तिक्ता नेत्र्या रसायनी । मधुरा बृंहणी बल्या वृष्या वातविषप्रणुत् । गुल्मप्लीहयकृद्-वृद्धिकफज्वरहरी, हरेत् । वन्ध्यग्निदग्धविस्फोट-पलितत्वत्वगामयान्” ।

७अपराजितायां ८जम्बुद्वीपांशभेदे कुमारिकाखण्डे ९सहायां मेदि० । १०सीतायां हेमच०११वन्ध्याकर्कोट्याम् १२स्थूलैलायां १३मोदिनीपुष्पे । १४तरुणीपुष्पे १५श्यामा-पक्षिणि राजनि० ।

**कुमारीक्रीडनक** न० कुमारीभिः क्रीड्यतेऽनेन क्रीड–करणे ल्युट् ततः यावादि०स्वार्थे क । कुमारीक्रीडासाधने द्रव्ये

**कुमारीपुत्र** पु० । १कानीने कन्याकालोत्पन्ने पुत्रे स च मातामहपुत्रः कानीनशब्दे विवृतिः । ततः प्रकारवचने स्थूलादि० कन् । कुमारीपुत्रक तत्सदृशे त्रि०

**कुमारीश्वशुर** पु० ६त० । विवाहात् पूर्व्वं धर्षितकन्यायाः भर्त्तुः पितरि । ततः प्रकारे स्थूला० कन् । तत्-सदृशे त्रि०

**कुमाल** केलौ अद० चुरा० उभ० अक० सेट् । कुमालयति ते अचुकुमालत् त । कुमालयां बभूव आस चकार चक्रे

**कुमालक** पु० कुमाल–ण्वुल् । सौवीरदेशे हेमच० ।

**कुमुद्** न० कौ मोदते मुद–क्विप् ७त० । १कैरवे मेदि०२रक्तो-त्पले त्रिका० । कुत्सिता मुदस्य । ३कृपणे त्रि० मेदि० । ४अप्रीते च त्रि०शब्दर० । कुगतिस० । ५कुत्सितमोदे स्त्री

**कुमुद** न०कौ मोदते मुद–क ७त० । (सुँदि) कैरवे अमरः । “कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव” पञ्चत० । “कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीत-लम्” भाव० प्र० तद्गुणा उक्ताः । २रक्तपद्मे मेदि० ३रूप्ये हेमच० । ४कर्पूरे पु० राजनि० अयमर्द्धर्चादि ५शाल्मलिद्वीपस्थे वर्षपर्वतभेदे । कुन्दशब्दे उदा० । ६दक्षिणदिग्गजे अमरः तस्य श्वेतोत्पलनिभत्वा-त्तथात्वम् । कुं भूमिं मोदयति मुद–अन्तर्भूतण्यर्थे–क । ७विष्णौ “कुमुदः कुन्दरः कुन्दः पर्जन्यः पावकोऽनिलः” विष्णुस० । ८पद्मे न० त्रिका० । “यस्य बाला बहुव्यासा दीर्घलाङ्गूलमाश्रिताः । ताम्राः पीता शीताश्चैव प्रकीर्णा घोरकर्म्मणः” रामा० उक्त लक्षणे ९वानरभेदे । “सुषेणमैन्दद्विविदैः कुमुदेनाङ्गदेन च” भा०व०२८८अ० । १०विष्णुपारिषदभेदे । “प्रहस्ता-नुचरा विष्णोः प्रत्यषेधन्नुदायुधाः” इत्युपक्रमे कुमुदः कु-मुदाक्षश्च विष्वक्सेनः पतत्त्रिराट्” भाग० ८,२१,१० । ११मेरोरुपष्टम्भगिरिभेदे पु० । “मन्दरोमेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नतामेरोश्चतुर्दिशमवष्टम्भ--गिरय उपक्लृप्ताः” भा०५,१६,१ “एवं कुमुदनिरूढोयः शतवल्शोनाम वटस्तस्य स्कन्धेभ्योनीचीनाः पयोदधिमधु-गुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तदुत्तरेणेलावृतमुपयोजयन्ति” तत्रैव १२सर्पभेदे कुमुद्वतीशब्दे रघुवाक्यम् । “कुमुदः कुमुदा-क्षश्च तित्तिरः हलिकस्तथा०भा०आ३५अ०१३दैत्यभेदे च । ततः कुमुदा० चतुरर्थ्यां ठक् । कौमुदिक तत्सन्नि-कृष्टादौ त्रि० । तत्रार्थे ठच् । कुमुदिक तत्रार्थे त्रि०

**कुमुदखण्ड** न० कुमुदानां समूहः कमला० खण्डच् । १कैरवसमूहे । ६त० । २कुमुदस्य भागे

**कुमुदगन्ध्या** स्त्री कुमुदस्येव गन्धमर्हति ष्यङ् । कुमुदगन्ध-युक्तायां स्त्रियां ततः करीषगन्ध्याशब्ददर्शितं कार्य्यम् ।

**कुमुद्घ्नी** स्त्री सुश्रुतोक्ते क्षीरविषवृक्षभेदे । यथा “कुमु-द्घ्नी स्नुही जालक्षीर्य्याणि त्रीणि क्षीरविषाणि” ।

**कुमुद्नाथ** पु० ६त० । चन्द्रे तस्य प्रकाशेन कुमुदस्य प्रकाशात्तस्य तथात्वम् । कुमुदपत्यादयोऽप्यत्र

**कुमुद्बन्धु** पु० ६त० । चन्द्रे तत्प्रयाशकत्वात्तस्य तथात्वम् कुमुदसुहृत्कुमुदबान्धवादयोऽप्यत्र । [न्याम् भरतः ।

**कुमुद्वती** स्त्री कुमुदानि सन्त्यस्यां मतुप् मस्य वः । कुमुदि-

**कुमुदा** स्त्री कुत्सितं मोदते मुद–क टाप् । १कुम्भिकायां (पाना) २गाम्भारीवृक्षे मेदि० । ३शालपर्णीवृक्षे ४कट्-फले राजनि० । संज्ञायां कन् । कट्फले अमरः । गौरा० ङीष् । कुमुदी कट्फले स्त्री शब्दरत्ना० ।

**कुमुदाकर** पु० ६त० । कुमुदस्थाने ह्रदादौ “कुमुद्वतीनां कुमुदाकरैरिव” माघः

**कुमुदाक्ष** पु १नागभेदे२विष्णुपारिषदभेदे च कुमुदशब्दे उदा०

**कुमुदादि** पु० पाणिन्युक्ते चतुरर्थ्यां ठच्प्रत्ययनिमित्ते शब्दगणभेदे स च गणः “कुमुद शर्करा न्यग्रोध इक्कट सङ्कट कङ्कट गर्त्त वीज परिवाप निर्यास शकट कच मधु शिरीष अश्व अश्वत्थ वल्वज यवास कूप विकङ्कट दशग्राम” । कुमुदिक कुमुदसन्निकृष्टदेशादौ त्रि० स्त्रियां षित्त्वात् ङीष् । तत्रैवोक्ते तदर्थे ठक्प्रत्ययनिमित्ते २शब्दगणभेदे स च गणः । “कुमुद गोमय रथकार दशग्राम अश्वत्थ शाल्मलि शिरीष मुनिस्थल कुण्डल कुट मधुकर्ण घास कुन्द शुचिकर्ण” । कौमुदिक तत्सन्नि-कृष्टदेशादौ त्रि० स्त्रियां षित्त्वात् ङीष् ।